मलास्तुरङ्गतुं नगाश्विनः । नवाष्टनवनेत्राणि पावकैकयमाग्नयः । गजाग्निसागरगुणा उत्क्रमज्यार्द्धपिण्डकाः”

**ज्याघातवारण** न० ज्याया आघातं वारयत्यनेन वारि-करणे ल्युट् । गोधायां ज्याघातवारणार्थे धान्विनां हस्तनिबद्धे चर्म्मभेदे अमरः । [ त्रि०मेदि० ।

**ज्यानि** स्त्री ज्या–नि । १वयोहानौ २तटिन्याम् ३जीर्णे

**ज्यायस्** त्रि० अतिशयेन प्रशस्यो वृद्धो वा प्रशस्य+वृद्ध+वा ईयसुन् ज्यादेशः ईयसुनि आदेरात्त्वम् । १अतिवृद्धे २जीर्णे ३प्रशस्ते च । “ज्यायान् पृथिव्या ज्यायानन्तरीक्षाज्ज्यायानेभ्यो लोकेभ्यः” छा०उ०। स्त्रियां ङीप् । “ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्द्दन !”गीता

**ज्यु** गतौ भ्वा० आत्म० सक० अनिट् । ज्यवते अज्योष्ट जुज्युवे । [ अज्युतत् अज्योतीत् । जुज्योत ।

**ज्युत** दीप्तौ भ्वा० पर० सक० सेट् । ज्योतति इरित् ।

**ज्युत** दीप्तौ भ्वा०आत्म० अक०सेट् । ज्योतते अज्योतिष्ट । जुज्युते । ऋदित् । अजुज्योतत् त । ज्योतिः ।

**ज्येष्ठ** त्रि०अतिशयेन वृद्धः प्रशस्यो वा वृद्ध+प्रशस्य+वा इष्ठन् ज्यादेशः ।१अतिवृद्धे २प्रशस्ये ३अग्रजे भ्रातरि ४अग्रजभगिन्यां स्त्री ।५अश्विन्यादिनक्षत्रेषु अष्टादशे नक्षत्रे स्त्री तद्रूपादि अश्लेषाशब्दे ४९७ पृ० दृश्यम् । ज्येष्ठानक्षत्रयुक्ता पौर्णमासी अण् ज्यैष्ठी सास्मिन् मासे पुनरण् संज्ञात्वात् ह्रस्वः । ६ज्येष्ठ ज्यैष्ठमासे मेदि० । गौरा० ङीष् । ७गृहगोधिकायां स्त्री शब्दरत्ना० ।

तस्याः दिग्भेदे कृतफलं ति० त० उक्तं यथा

“वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये । वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने । ज्येष्ठीकृते च्युतेऽप्येवमूचुः केचिच्च कोविदाः”अधिकं गृहगोधिकाशब्दे २६५७पृ०दृश्यम् । ८मध्यमाङ्गुलौ स्त्री हेमच०।९गङ्गायां स्त्री राजनि०तस्याः पार्वत्याः प्रथमं हिमालयाज्जातत्वात् तथात्वम् । १०परिणीते भर्त्तुरधिकस्नेहभाजने नायिकाभेदे रतिमञ्जरी । लक्ष्म्याः प्रथमोत्पन्नायां ज्येष्ठभगिन्याम् ११अलक्ष्मीदेव्यां स्त्री । तदुत्पत्त्यादिकथा पद्मपु० उत्त०ख०उक्ता यथा“मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् । तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ! । ज्येष्ठा देवी समुत्पन्ना रक्तस्रग्वाससावृता । उत्पन्ना साऽब्रवीद्देवान् किं कर्त्तव्यं मयेति वै । तामब्रुवंस्तदा देवीं सर्वे देवगणा भृशम् । येषां गृहान्तरे नित्यं कलहं संप्रवर्त्तते । तत्ते स्थानं प्रयच्छामो वासस्तत्र शुभानने ! । यस्य गेहं कपालास्थिभस्मकेशादिचिह्नितम् । भाषन्ते परुषं नित्यं वसन्त्यनृतवादिनः । सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः । तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी । कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु । तत्र ते वसतिस्थानं भविष्यति न संशयः । अकृत्वा पादयोः शौचं यस्त्वाचामति दुर्मतिः । तं भजस्व सदा देवि ! कलुषेणावृता भृशम् । तुषाङ्गारकपालाश्मवालुकायसचर्मभिः । दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः । रमस्व मलिना देवि ! तेषां वेश्मसु नित्यशः । तिलपिष्टञ्च नक्तञ्च कालिङ्गशिग्रुगृञ्जनम् । छत्राकं विड्वराहञ्च बिल्वकोषातकीफलम् । अलाबुं श्रीफलं ये वै खादयन्ति नराधमाः । तेषां गृहे तव स्थानं देवि ! दारिद्र्यदे ! सदा । इत्यादिश्य सुराः सर्वे ते ज्येष्ठां कलिवल्लभाम् । पुनश्च मन्थनं चक्रुः क्षीराब्धिं सुसमाहिताः” । १२नादजातायां ब्रह्मप्रकृतिभूतायां देव्यां स्त्री “रौद्री विन्दोस्ततो नादाज्ज्येष्ठा बीजादजायत । वामा, ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः” शा० ति०। १३परमेश्वरे पु०। “ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः” विष्णुस० । १४प्राणे “प्राणो वा ज्येष्ठश्च श्रेष्ठश्च” छा० उ० । काशीस्थे १५ गौरीभेदे स्त्री ज्येष्ठस्थानशब्दे विवृतिः ।

**ज्येष्ठतात** पु० तातश्च ज्येष्ठः राज० पूर्वनि० । पितुरग्रजे भ्रातरि (जेटा) । [राजनि० ।

**ज्येष्ठबला** स्त्री ज्येष्ठं बलं यस्याः । सहदेव्यां लतायां

**ज्येष्ठवर्ण** पु० वर्णानां ज्येष्ठः राजद० पूर्वनि० कर्म० वा । ब्राह्मणे तस्य सर्ववर्णश्रेष्ठत्वात् तथात्वं । २श्रेष्ठे वर्णे च । [ स्थानशब्दे विवृतिः ।

**ज्येष्ठवापी** स्त्री काशीस्थज्येष्ठस्थानस्थे वापीभेदे ज्येष्ठ-

**ज्येष्ठश्वश्रू** स्त्री ज्येष्ठा मान्या श्वश्रूरिव संज्ञात्वात् पुंवद्भावः । पत्न्याः ज्येष्ठभगिन्यां (बड़शाली) हेमच० ।

**ज्येष्ठसामन्** न० नित्यकर्म० । सामभेदे । तच्च साम “मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः” सामार्चि० १प्र० १अ० २द० ५क० । इत्यस्यां गीयमानम् “वामदेव्यं बृहत्साम ज्येष्ठसामरथन्तरम् । तथा पुरुषसूक्तं च रुद्रसूक्तं ततः परम् ।